# शिवं शंभुमीडे

पल्लविः शिवं शंभुमीडे - भवं सांबमीडे
कृपारंभमीडे - ममालंबमीडे

१. नटेशानमेकं कळत्रेन साकं
जटाजूटभारे नदीवेग वाहं
पदद्वंद्व वेगात् चलत्पर्वताग्रं
करद्वंद्ववेगात् विभिद्यद्दिशाग्रं

२. वटक्ष्माजमूले जरन्मौनिजाते
वरज्ञानमुद्रा मिषव्यक्तबोधं
दरस्मेर राज - न्मुखाब्ज प्रसादात्
परिध्वस्त भक्त व्रजांतस्तमस्कं

३. सदा काशिकायां वनेनंदनाम्नि
स्फुरत्कांतिलिंग स्वरूपेण तिष्ठन्
नतांनां मनस्सु - स्वयं सच्चिदानं-
दतास्फूर्तिदाने - रतं वेदगीतं